International Journal of Applied Research 2016; 2(7): 249-253




**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2016; 2(7): 249-253
www.allresearchjournal.com
Received: 06-05-2016
Accepted: 07-06-2016

श्री राजेश कुमार
शोधच्छात्र, राष्ट्रीय संस्कृत संस्थान, नई दिल्ली, भारत

**Correspondence**
श्री राजेश कुमार
शोधच्छात्र, राष्ट्रीय संस्कृत संस्थान, नई दिल्ली, भारत

# अभिराजराजेन्द्रमिश्रस्य गलज्जलिकासु राष्ट्रियान्ताराष्ट्रिया च भावना

श्री राजेश कुमार

भारतसदृश: देश: येन द्विहस्रवर्षाणिपरतत्र्यं सोढं स: राष्ट्रियभावनया ओतप्रोत: कथं न भविष्यति। तत्रत्या: जना: राष्ट्रियभावनाशून्या: न भवितुमर्हन्ति। भारतीयज्ञानपरम्परायामपि राष्ट्रियभावना विशिष्टस्थानं भजते। 'राष्ट्रं संरक्ष्यमेव हि' वसुधैव कुटुम्बकम्, वयं राष्ट्रे जागृयाम, अस्माकं वीरा उत्तरे भवन्तु' इत्यादीन्येकानि ध्येयवाक्यानि वेदादिशास्त्रेषु पठाम: (विद्यन्ते) यैश्च प्रेरितो भूत्वानेके जना: स्वेदशं रक्षितुं स्वप्राणान् सहर्षमत्यजन्। वैदिकरामायणमहाभारतकालेऽप्यनेके वीरा: अभवन् ये जीवनं राष्ट्ररक्षार्थं जीवितवन्त: यथा भीष्म:, कृष्ण:, इत्यादय: आधुनिकसमये त्वनेके वीरा: सन्ति यै: प्रेरितो वर्तते भारतीयसमाज: तेषु महाराणाप्रताप: शिवाजीराजे भोसले, गुरुगोविन्दसिंह:, महारानी लक्ष्मीबाई, तांत्याटोपे, चन्द्रशेखर: आजाद:, सुभाषचन्द्रबोस:, भगतसिंह:, लालालाजपतराय:, वीरसावरकर: इत्यादय अनेके वीरा: सन्ति ये स्वप्राणै: स्वदेशं रक्षितवन्त:।

राष्ट्रियभावनां जागरणाय युद्धावश्यको न वर्तते। युद्धस्तु अन्तिमो प्रयासो भवति। परं तस्मात्पूर्वं जनजागरणाय साहित्यं महत्वूपर्णं स्थानं भजते। तात्कालिका: कवय: समाजसुधारकाश्च साहित्यरचनया जनेषु राष्ट्रियभावनामुत्पादयन्ति। राष्ट्रियभावना परतन्त्र सत्येव नावश्यकी सर्वदैव राष्ट्र सर्वोपरि भवति। अत: भावनैषा सार्वकालिको वर्तते। आचार्यराजेन्द्रस्य जीवनकालेऽपि भारतेन पाकिस्तानचीनदेशै: सह युद्धं कृतम्। राजेन्द्रमिश्रोऽपि राष्ट्रियभावनया प्रेरितोऽभूत्। अनया भावनया प्रेरित: कविना स्वकाव्ये गलज्जलिका साहित्ये राष्ट्रियभावना सम्पूरिता। कार्गिलयुद्धं भारतीयराजतन्त्रे आघात: आसीत्। तेन युद्धेन दु:खितो कवि: पूर्णा गलज्जलिका प्रस्तौति।

## कार्गिलम्

हृदयाणां स्पन्दनानि तीव्रयति कार्गिलम्। विद्वज्जनानां मति: जडीकरोति कार्गिलम्। पाकिस्तानदेशेन आतंकवादिना सह भारतस्य कार्गिलक्षेत्रं स्वाधिपत्यमस्थापयत्। तदा भारतीयसैनिका: स्वप्रयासेन तत्क्षेत्रं विजयेतुं प्रयत्नमाना: आसन्। प्रतिक्षणं दूरदर्शनादिभि: वीराणां सन्देशं प्राप्नुवन्तां हृदयाणां स्पन्दनानि वर्धितान्यासन्। भारतीयशासनस्य निर्णयेनैव पाकिस्तानेन तत्क्षेत्रमधीनं कृतमासीत् तमेव व्यंग्यति कवि:। श्रृगालोऽपि सिंहगुहामतिक्रामयितुं सक्षम: इति सत्यमुज्जवली करोति कार्गिलम्। श्रृगाला: पाकिस्तानिन: आतंकवादिनश्च सिंहस्य (भारतस्य) गुहाम् (कार्गिलक्षेत्रम्) अतिक्रामयन्ति। अत्र कवि: आतंकवादिनं श्रृगालेनाभिधाति। भारतीयशास्त्रेषु वर्णनमस्ति ''शठे शाठ्यं समाचरेत्' भारतीयशासनेन सूक्तिरियं कदापि नाचरिता तस्यैव दुष्परिणामो वर्तते कार्गिलम्। 1947 त: पाकिस्तानदेश: धूर्ततामचरयन् वर्तते परं भारतीयशासकै: नेहरू इत्यादै:' तस्य धूर्तताया: शठताया फलं तस्मै न प्रददात्। तेनैव कारणेन स: सर्वदा एतादृशानि कार्याणि करोति। स्वप्राणान् त्यजतां वीरयोद्धानां साहसं विलोक्य कस्य हृदयं चिरकालं न सन्तप्तयति। युद्धेऽस्मिन् अनेके वीरयोद्धा: स्वदेशरक्षार्थं स्वप्राणान् सहर्षमत्यजन्। तेषां वेदना सर्वेषां हृदयाणि सन्तप्तयति। बान्धवान्, कुटुम्बिन:, पुत्रं, भार्यां, वृद्धां मातरं, विहाय (त्यक्त्वा) वीरा: देशरक्षायै कार्गिलं धावितवन्त:। कार्गिलयुद्धे प्रतिदिनमनेके वीरा: स्वेदशरक्षार्थं स्वसर्वस्वं व्यक्त्वा धावन्त: अभवन्। एते शतश: नवाङ्कुरा: कस्य पापकर्मणा हुता: (मृता:)। अद्य रक्तलिप्तं कार्गिलं प्रश्नमिदं पृच्छति।

ये अनेके वीराः स्वप्राणान् सहर्षं बलिवेद्यां त्यक्तवन्तः। तेषां बलिदानं कस्य पापस्य कर्म वर्तते अर्थात् ये वीराः हुताः तेषां तु पापकर्म नासीत् तथापि ते स्वदेशरक्षायै स्वप्राणानत्यजन्। हन्त! यद्गृहं गहने तमसि विलुप्तं तत्पुनः कथं प्रकाशयिष्यतीति पृच्छति कार्गिलम्। अनेके वीराः यादृशाः मृताः ये स्वगृहस्य दीपकाः आसन् येषामभावेन गृहं तमसि विलीनं जातम्। अर्थात् मातुः एक एव पुत्र आसीत् सोऽपि कार्गिले शहीदो जातः। तस्य गेहे कः दीपं प्रज्वालयिष्यति? अर्थात् कोऽपि न। त्यजतु शासनं। राष्ट्ररक्षार्थं समर्थाः न सन्ति तु हिमोच्चये संज्जवलन् क्रन्दयति कार्गिलम्। कार्गिलं तत्स्थानं वर्तते यत्र सर्वत्र हिमाच्छादितानि पर्वतशिखराणि वर्तन्ते। कवेः चिन्तनमस्ति यत् राष्ट्राध्यक्षाः स्वदेशरक्षितुमसमर्थाः सन्ति ते स्वपदं त्यजन्तु। बालसूर्यवत् सैनिकाः यौवन एव निरर्थकं शत्रुहस्तैः मारिताः इत्थं विचार्य दारूणं विरौति कार्गिलम्। ये सैनिकाः मृताः ते युवकाः आसन् तेषां मरणं निरर्थकं वर्तते यतोहि पूर्वयोजनया कार्यं न कृतं सर्वकारेण। सांसदान् व्यंग्यन् कविः कथयति संसदतिरिच्य सम्पूर्णं भारतं विध्वस्ताम् का हानिः विलापयति कार्गिलम्। अर्थात् सर्वे नेतारः आलपत्येवं परं युद्धाय न यतन्ते। प्रशासनं व्यंग्यन् कविः कथयति शासनाधिकारं प्राप्तुं कातरैः जनैः राष्ट्रमिदं शासितुं न शक्यते इति सिद्धयति कार्गिलम्। अस्माकं देशस्य राजनेतारः प्रशासनं प्राप्तुमनेकधा व्यवहरन्ति ते राष्ट्रं शसितुमसमर्थाः सन्ति।

स्पन्दनानि चेतसां गुणीकरोति कार्गिलम्
चिन्तनानि धीमतां जड़ करोति कार्गिलम्।
राष्ट्रशासनस्य शा श्वतीमदूरदर्शिताम्
डिण्डिमेन भूरि भूतले तनोति कार्गिलम्।
जम्बुकोऽपि सिंहकन्दरे सुखं समाविशेत्
सत्यमेतदुज्जवलीकरोति किन्न कार्गिलम्।।[1]

वर्तमानसमये पूर्णविश्वः आतंकवादेन ग्रस्तो वर्तते। सर्वत्र वैमनस्यं दृश्यते अनेके देशाः स्वप्रभुत्वं स्थापपितुं यतमानाः सन्ति। एतदर्थमेते बलप्रयोगं कुर्वन्ति। प्रत्येकदेशः स्वाधुनिकास्त्रशत्राणि निर्मापयन्ति तेषाञ्च प्रयोगः अन्येषु कुर्वन्ति। दृश्यमेनं दृष्ट्वा कविः चिन्तयति यत् अस्य संसारस्यास्तित्वं तावदेव विद्यते यावत् संसारोऽयं पापबुद्धिं नाश्रयति। अर्थात् पापबुद्धिमनुसृत्य आणविकास्त्राणि नोपयुज्यते। आणविकास्त्राणां प्रयोगेण सम्पूर्णः संसारः नष्टः भविष्यति। अतः आन्ताराष्ट्रियाभावनावश्यकी। वर्तमानसमये सासम्भवा दृश्यते।

विश्वमिदं नूनं गृहकल्पं
जगत्कुटुम्बं जानीमः।

वयं भारतीयाः सम्पूर्णं विश्वं कुटुम्बं जानीमः। भारतीयविचारधारा सर्वहिताय वर्तते। अतःवयं सर्वान् स्वबन्धुवत् पश्यामः, व्यवहारमपि तथैव कुर्मः। अत एव अन्येषां दुःखान् स्वदुःखं परिगणयामो वयम्।
विश्वबन्धुत्वभावनायां या न्यूनता जायमानो दृश्यते तस्य कारणं धर्माधिकारिणः सन्ति। अत एव कविराजः धर्माचरणे लीनजनान् व्यंग्यति। पूर्णधरायामनेकानि धर्माणि सन्ति वर्तमानसमये तेषामाधारः तद्धर्मस्य प्रमुखः धर्माचार्यो वर्तते यथा ईसाई धर्मे 'पोप' मुस्लिमधर्मे मौलवी, हिन्दूधर्मे मठाधीशाः एते सर्वे धर्मस्य मूलरूपं त्यक्त्वा 'धृयते धार्यते तद्धर्मम्' आचारः परमो धर्मः, धृतिक्षमादमोस्तेयः, अहिंसा परमो धर्मः, इत्यादीनि धार्मिककार्याणि तु न कुर्वन् अन्योन्यान् दूषयन् सर्वत्राशान्तिमुत्पादयन्ति। केचन कथयन्ति ये मम धर्मानुसारिणः न सन्ति ते हन्तव्यः अन्यश्च कथयति ये निर्धनानि सन्ति तेभ्यो धनं दास्यामः इत्थमेव सर्वत्र वैरभावमुत्पादयन्ति धर्माधिकारिणः सुखानि भजन्ते। एतेष्वनेके दुराचरणमाचरन्तः मदिराकान्तालीनाः सन्ति। अत एव पूर्णधरायां चतुर्दिक्षुः केवलं युद्धमेव श्रूयते। कस्मिन्नपि देशे शान्तेः वातावरणं न दृश्यते।

विलासे रतो धर्मवन्तोऽपि नित्यम्
भुवि श्रूयते सर्वतो हन्त जन्यम्।।[2]

कोऽपि देशः स्वनीतिनाग्रे वर्धते। नीतिहीनः देशः भारतवत् दूषयति यथा भारतस्य पाकिस्ताननीतिः आंतकवादिनः कृते नीति, चौराणां कृते नीतिः, भ्रष्टाचारीणां कृते नीतिः बलात्कारीणां कृते नीतिः, अधुनापर्यन्तमेनेकेषु विषयेषु नीतिः स्पष्टं न वर्तते। अनेनैव कारणेन भारत एतैः दुःखीक्रियते। कवेः विचारो वर्तते यत् देशस्य नीति श्रेयस्करी स्यात् तेन राष्ट्रयशोगाथा सर्वत्र गीयते। तदैव सर्वत्रमैत्रीभावेन मंगलाभ्युदयो भविष्यति।
समवायो हि दुर्जयः, संघे शक्ति कलौ युगे, इत्थं भावनया प्रेरितो मनुष्यः राष्ट्रं वा सर्वदैवोन्नतिमाप्नोति परं वर्तमानसमये भारतदेशे तु कथमपि न सम्भाव्यते यतो हि अत्र तु सर्वे स्वमते पूर्वाग्रहेण ग्रस्ताः सन्ति। भारतीयपरम्परायामेषा न्यूनता वर्तते यदस्माकं श्रेष्ठां वार्ता जनाः निन्दयन्ति अपरेषाञ्च (वैदशिकानाम्) तामेव वार्ता सहर्षं स्वीकुर्वन्ति यथा आर्यभट्टः, पाइथोगोरससिद्धान्तमेवमेकानेके विषयाः सन्ति यत्र भारतीयवैज्ञानिकाः स्वसिद्धान्तं सुष्ठुतया स्थापितम्। परं तात्कालिकेन समाजेन मतिभिन्नेव तन्न स्वीकृतम्। किन्त्वद्यत्वे वैदेशिकविद्वद्भिः त एव सिद्धान्ताः प्रस्तुतयन्ते। अतः कवेः विचारोऽस्ति यत् प्रत्येकमस्तिष्के सपूर्वाग्रहेण युक्ता मतिः वर्तते तु हे प्रभो! भारतराष्ट्रस्य कल्याणं न प्रतीयते। अर्थात् वयं भारतीयाः राष्ट्रायापि एकत्वं नानुचरामः।[3]
यथा वर्तमानसमये अनेके तथाकथिताः बुद्धिमन्तः आतंकवादिनः (अफजल गुरु रोहित वेमुला, कन्हैया, इशरतजहाँ, उमर खालिदः) आतंकवादी न मत्वा स्वपुत्रपुत्रीवद् व्यवहरन्ति। अत एतादृशाः जनाः कथमेक्यं स्थापयिष्यन्ति। आभिस्तु राष्ट्रं विभक्तं भविष्यति।

राष्ट्रियताया अभावः
वर्तमानभारतराष्ट्रं समीक्ष्य (दृष्ट्वा) कविराज राष्ट्रानुरतमनः तुदति। अत एव कविः राष्ट्रं हन्यमानानि कारणान्युद्धृत्य पूर्णां गलज्जलिकामात्मलेखन्या हृदयतले रचयति- विभिन्नजनपदेषु प्रसह्यं विभक्तं ममेदं भारतराष्ट्रमधुना एतेषु जनपदेषु विलीनं भारतराष्ट्रं कुत्र गवेषयाणि? अर्थात् भारतराष्ट्रे कमपि पृच्छतु त्वं कुत्रस्थः स उत्तरयति केरलीयोऽहं, बिहारी अहम् इति। कोऽपि नोत्तरति भारतीयोऽहम्। अयमेव वेदना कविराजं व्यथयति। तेनैव सह प्रत्येकं राष्ट्रनायकं व्यथयति ये स्वदेशाय सहर्षं प्राणान् त्यक्तवन्तः। एतत् विहारम्, एतत्

मध्यप्रदेशं, उत्तरप्रदेशम्, आन्ध्रपद्रेशम् इत्यादिशब्दैः जनाः राज्यमात्रमेव बोधयन्ति तु धरायां विस्तृतं (प्रसरितं) स्वकीयं भारतराष्ट्रं कुत्रावगच्छामि। यः यत्र जातः स तत्रस्थोऽभूत् तु कश्मीरतः कन्याकुमारीं यावत्, अमृतसरतः कोहिमा पर्यन्तं विस्तीर्णं भारतराष्ट्रं कं पृच्छानि। वयं कथयामः कश्मीरतः कन्याकुमारीं भारतमेकराष्ट्रं वर्तते परं व्यवहारे तु न दृश्यते। यथा वयं पश्यामः अनेके जनाः जन्मस्थानेन स्वराज्यनामभिधातुं प्रयत्नमानाः सन्ति। अनेन व्यवहारेणैकराष्ट्रं कुत्र गतं न जाने। अहिंसायाः व्यथितो भूत्वा गौतमबुद्धेन पृथक् सम्प्रदायमारभ्य अहिंसायाः पाठः पाठितश्च। परं वर्तमानसमये तस्यैव बुद्धस्य राष्ट्रे (भारते) अनारतं निरापराधानां प्राणीनां हिंसा प्रवर्तमाना वर्तते तु 'अहिंसा परमोधर्मः' इत्यनुचरन्तं भारतराष्ट्रं कुत्र पश्यानि। दक्षिणभारते स्थितं रामेश्वरम् यस्य स्नानं गंगाजलेन (उत्तरभारते प्रवहति गंगानदी) प्रतिदिनं भवति अर्थादुत्तरदक्षिणयोर्मेलनं प्रतिदिनं भवति। परं वास्तविकतया तथा न दृश्यते। अत एव कविः कथयति यस्मिन् देशे रामेश्वरः गंगाजलैः प्रतिदिनं स्नाति तत्सौम्यसमीचीनं सदयं भारतराष्ट्रं कुत्रास्ति। सर्वे प्रान्तीयाः, धार्मिकाः, जानपदीयाश्चान्योन्यं न विश्वसन्ति। अत सर्वत्रालगाववादः (पृथक्त्वभावम्) दृश्यते। उत्तरीयः बिहारीयं तिरस्करोति उत्तरीयञ्च दाक्षिणात्यः तिरस्कुर्वन्ति। व्यवहारोऽपि पक्षपातपूर्णोऽभवत् तु एकसूत्रेण निबद्धं भारतराष्ट्रं कुत्र वर्तते? भगवतः शिवस्य निवासः कैलाशपर्वतोऽस्ति, वर्तमानसमये स्थानमेतच्चीनराष्ट्राधीनं वर्तते यत्र गन्तुं चीनदेशानुमतिरावश्यकः। सिन्धुनदः सिन्धुनद्या उद्गमस्थानं वर्तमानपाकिस्तानदेशे वर्तते। तथैव शारदापीठः प्राचीनकाले शिक्षायाः प्रमुखं स्थानमाद्यगुरूशंकराचार्येण स्थापितः वर्तमानसमये पाकाधिकृतकश्मीरे क्षतविक्षतावस्थायां विद्यमानः हिंङ्गलाजशक्तिपीठश्च पाकिस्ताने बलूचिस्तानक्षेत्रे विद्यते। एतानि सर्वाणि स्थलानि भारतीयास्थायाः मान्यतायाः राष्ट्रैकतायाश्चाधारभूतान्यासन् परं वर्तमानभारतराष्ट्रे न विद्यन्ते। अत एव आभिर्विहीनं राष्ट्रं पश्यामि। अर्थात् मम भारतराष्ट्रं एकं नावशिष्टं तस्यानेकान्यनानि राष्ट्राणि जातानि। 'वीरभोग्यावसुन्धरा' इति भारतीयराष्ट्रस्य ध्येयवाक्यमासीत् तमनुस्सरन् वीराः स्वेदशरक्षायै तत्पराः आसन् परमधुना तद्राष्ट्रं क्लीबभोग्यं जातम् अर्थात् ये राजनेतारः सन्ति राष्ट्रभोक्ताः अभवन्। ते च स्वकर्मणि क्लीबत्वमाप्नुवन्तः एतदर्थमेव तुच्छ निकृष्टाः आतंकवादिनः स्वैरं विहरन्ति। अनेनैव कारणेन मम राष्ट्रं भारतं विपन्नं जातम्।

> राष्ट्रमेतद् विभाजितं प्रसह्य जनपदैः
> क्व मार्गयानि विलीनं स्वभारतं बन्धो।।
> इमेऽङ्गबङ्गकलिङ्गा इमेऽसमा नागाः
> कमाश्रयानि कुलीनं स्वभारतं बन्धो।।
> यो हि यत्रैव जनिं प्राप सोऽन्वितस्तस्मिन्
> कं नु पृच्छानि विकीर्णं स्वभारतं बन्धो।।[4]

राष्ट्रियभावनापूर्णः कविः भारतं नौकावत् प्रस्तुवन् राष्ट्रभक्तानां वर्णनं करोति- वयं राष्ट्रसेवका (सैनिकाः वीराश्च)। अस्माकं राष्ट्र नौकावदगाधे समुद्रे निमज्जतुः (निमग्नयितुं)[5] न त्यक्षामः यतो हि वयं सावधानाकर्णधाराः स्मः। अर्थात् अस्मिन् देशे कियदपि आतंकवादिन आगच्छेयुः वयं (सैनिकाः) सर्वेषां नाशं करिष्यामः। वर्तमानसमयेऽनेकवैदशिकशक्तयः भारतं नाशयितुं प्रयतमानाः सन्ति परमस्माकं देशस्य जागरूकाः सैनिकाः (सर्वे पुलिस, सशस्त्र बल, सुरक्षाबल, केन्द्रीय बल) सदैव भारतराष्ट्रं स्वप्राणैः रक्षमाणाः सन्ति।

> नौरियं नो निमङ्क्ष्यत्यगाधेऽमबुधौ
> सावधाना यतः कर्णधारा वयम्।।

राष्ट्राय कदापि वैरिणं न त्यक्तव्यम्। इत्येव वर्णयति कविः। त्रिवारं युद्धे पराजितो भूत्वापि पाकिस्तानः शत्रुवत् व्यवहरन् स्पर्धते। अर्धहतं सर्पं कदापि न त्यक्तव्यम्। भारतदेशेन सह पाकिस्तानदेशः त्रिवारं 1962, 1973 कार्गिलम् (1999) युद्धमकरोत् सर्वदैव परिजातोऽभूत् तदापि सः भारतं प्रति वैरभावं धारयति। सः येन केन प्रकारेण भारतं पराजेतुं प्रयतते। अत एव कविः कथयति सर्पो सदैव पूर्णरूपेण मारणीयम् यतो हि अर्धहतं सर्पं कदापि दंशयिष्यति। अर्थात् कवेः विचारो वर्तते यत् पाकिस्तानं पूर्णतया पराजित्य स्वाधिकारे करणीयम् तदैव समस्यैषा विलुप्ता भविष्यति।[6]

> त्रिधा समारङ्गणे परिमर्दितोऽपि स्पर्धते शत्रुः
> भुजङ्गा अर्धनिहता नैव कथमपि जातुमुच्येरन्।

अन्ताराष्ट्रियाभावना

अन्ताराष्ट्रियभावनया प्रेरितः कवि पूर्णा धरामेका पृथ्वी (कुटुम्बवत्) कथयति किं पृथ्वीपूजायोग्या न वर्तते यया सहजभावेन स्वास्तित्वं सन्ततिषु विभक्तम्। पूर्णधरायामनेके देशाः स्वसीमानुसारेण प्रभुत्वं स्थापयन्तः विद्यन्ते परमेतानि राष्ट्राणि धरायामेव सन्ति नान्यत्र। अतः सर्वे देशाः भूमातुः पुत्राः सन्ति। येभ्यः पुत्रेभ्यः (देशेभ्यः) क्षेत्रपरिमितं भागं दत्त्वा सा धरा सुखेनावस्थितुं प्रयतते यथा लौकिकव्यवहारे सन्ततयः स्वपितरधनानि विभज्यन्ते। अतः कविः संदेशयति यत् एकमातुः पुत्रवत् व्यवहरन्तः सर्वे देशाः धरायां निवसेयुः।[7]

> किन्न पूज्या धरेयं, यया सार्जवम्
> सन्ततिभ्यो निजास्तित्वमाबण्टितम्।।

राष्ट्रभावनापरिपूर्णः कविः स्वदेशं प्रति स्नेहं प्रकटयन् ईश्वरं निवेदयति यन्ममाग्रिमजन्मः भारतवर्ष एव भवितव्यः। तमिलनाडौ, केरले, आंध्रप्रदेशे, बंगाले, राजस्थाने, कुत्रापि भवेयम् परं स्वभारतराष्ट्रे एव पुनर्जन्म ग्रहीष्ये।[8]

> चोलेऽथ केरले वा बङ्गेऽथ मरूवणे वा
> ननु भारते स्वकीये पुनरपि जनिं ग्रहीष्ये।

सिक्खानां देशप्रेम

भारतदेशं स्वतत्रं कर्तुं सिक्खसमुदायेन पूर्णप्रयासः कृतः। देशस्वतन्त्रतायै गुरोः बालकाः दुष्टेन औरंगजेबेन भित्तौ विचिन्वताः। तथापि समुदायेनानेन राष्ट्रविरूद्धं कार्यं न कृतम्। अधुनापि भारतीय सुरक्षादले

(सैनिकाः) सर्वाधिकाः सिक्खाः सन्ति। सर्व एव देशरक्षायै सर्वदा तत्पराः। परं कथ्यते 'मुण्डे मुण्डे मतिर्भिन्ना' अनेन सूक्तिना समेषां मतिः समाना न भवति। अतः 1983-84 तमे वर्षे केचन राष्ट्रविरोधिनः सिक्खाः देशं विभक्तुं प्रयत्नमानाः आसन्। ते खालिस्तानप्रदेशं (खालसा पन्थानुचराणाम्) पृथक्तया राष्ट्रत्वेन याचन्ते स्म। तदा देशे राष्ट्रियभावनायां विरोधाभासः जातः तत्कालस्यावस्थां स्मरन् कविः तान् राष्ट्रभक्तान् व्यंग्यति कियद्दुःखयति कथनमिदं यत् राष्ट्ररक्षाकर्तृभिः खालिस्तानं याचना क्रियते। स्वकर्तव्यमुपेक्ष्य (देशरक्षाम्)।[9]

हन्त! खालिस्तानयाचनया भृशम्
रक्षिभिस्स्वयमेव राष्ट्रमुपेक्ष्यते।।

भारतराष्ट्रस्य दुर्दशामवलोक्य राष्ट्रानुरक्तः कविहृदयः व्यंग्यन् राष्ट्रस्य मार्मिकं वर्णनं करोति। भारतस्य दुर्दशा वर्धमाना वर्तते। अनया दुर्दशया भारतस्य विनाशो जायते यथा नदीप्रवाह वेगेन (उग्ररूपेण) स्वतटबन्धान् त्रोटयति तथैव भारतीया अपि स्वकर्मभिः स्वराष्ट्रं नाशयन्ति। नदी तटबन्धत्रोटनेन तस्याः जलं सर्वत्र व्याप्तं भूत्वा ग्रामं नगरं निगृणाति। आम्रवृक्षाः कर्तिताः आल्हादिनी कोकिला भृशं निराशाजाता। अर्थात् कोकिला आम्रवृक्षमाश्रयति तथैव धूर्तैः जनैः स्वराष्ट्रस्याधाराः (स्नेहः, सदाचारः, प्रेम) नाशिताः। अनेन कारणेन सर्वत्र सहृदयभावनामभावो दृश्यते। जनाः अन्योन्यं न विश्वसन्ति। वैरीभावं द्वेषभावञ्च धारयन्ति या कृपाणी रक्षायै धारितासीत् सैवाधुना स्वबन्धुबान्धवान् रोषेण विनाशयति। मुगलाक्रान्तेभ्यः स्वराष्ट्ररक्षायै गुरूगोविन्दसिंहेन सप्रतिज्ञया कृपाणं धारयितमासीत्। तत एव सर्वे सिक्खाः कृपाणं धारयन्ति। परं तदेव कृपाणं स्वबन्धुबान्धवानां वधाय समुद्यतं वर्तते। देवनदी गंगा नयनाश्रुं वहती विलापदृष्ट्या भारतीयान् पश्यति। गंगाया यज्जलं वर्तते तज्जलं तस्याः रोदनेन (भारतदुर्दशां दृष्ट्वा) निर्गता अश्रुधारा वर्तते। गंगायाः उद्भवः भारतीयान् पावयितुमभवत्। परमधुना सापि भारतीयान् दृष्ट्वा स्वयमेव रोदमाना वर्तते। भारतपाकविभाजनसमये (1947) हिंसा सर्वत्र व्याप्ता आसीत्। पाकिस्तानात् भारतीयान् (हिन्दू) मारयित्वा भारतं प्रति प्रेषयन्ति स्म। इतोऽपि मुस्लिमाः पाकिस्तानं प्रति गन्तुमुद्यताः आसन् सर्वत्र वैमनस्यं विस्तृतमासीत्। सा एव हिंसा पुनः 1983-84 तमे वर्षे पुनः पंजाबप्रान्ते उत्पन्ना जाता। अतः कविः खालिस्तानं याचमानान् जनान् व्यंग्यति भारतविभाजने या हिंसा विपत्तिकारणमभूत् सैव हिंसाधुना युष्माकं (खालस्तिानं याचमानानाम्) भगिनी कथं जाता? अतः ते कथं हिंसामाश्रयन्ति। सम्यग् जानन्तु हिन्दूसिक्खौ सहोदरौ, पापमाश्रित्य भारतराष्ट्रं खण्डयितुम् मा प्रयत्नेयुः। अर्थात् सिक्खाः हिन्दवाश्च प्राचीनकालात् सहोदरौ वर्तेते गुरूनानकेन मुस्लिमाक्रान्तायै राष्ट्रं रक्षितुमन्यः सम्प्रदायः प्रवर्तितः। स एव सम्प्रदायः गुरुगोविन्दसिंहस्य नेतृत्वे सिक्खसम्प्रदायत्वेन (मतम्) सुस्थापितः। तत एव सिक्खः धर्मः (सम्प्रदायः) प्रवर्तितः। मूले सर्व एव हिन्दवः सन्ति। एकतः आर्यभट्टादिभिः (उपग्रहप्रक्षेपेण) भारतस्य यशः अपरतश्च एष आन्तरिकद्वैषोऽलगाववादश्च अर्थात् भारतः स्ववैज्ञानिकप्रयोगैः स्वयशः वर्धमानो वर्तते परमान्तरिकद्वेषेण द्रोहोत्पन्नः जातः। अर्थात् सिक्खाः हिन्दवश्चान्योन्यं घ्नन्ति। एतत् राष्ट्रं कथं गौरवमाप्नुयात्। अस्य सन्ततय एव अस्यनाशाय रताः। भारतस्य गौरवं कथं भविष्यति यदा वयं परस्परं कलहमाकलयिष्यामः। अर्थात् भारतगौरवार्थं पारस्परिकं स्नेहमावश्यकम्। भारतीयराष्ट्रस्यावनतेः एकं कारणमत्रत्यः राजनीतिरपि वर्तते। राजनीतिं वर्णयन् महाकविना माघेन पूर्वमेव निकृष्टं कथितम्। तमेवोद्धृत्याचार्यः भारतीय राजनीति निन्दयति। माघः पूर्वमेवोक्तावन्, वयं किं कथयिष्यामः? यत् भारते राजनीतिः कियत्पस्पशा। भारते येषां राज्ञो (अधिपत्यम्) वर्तते ते शशकाः इव सन्ति ते च व्याघ्रान् शासयन्ति। अर्थात् दुर्बलाः सबलान् शासयन्ति। एषा गलज्जलिकाचार्येण कविराजेन्द्रेण हिन्दूसिक्खनामलगावेन (1984 तमे) ख्रिस्ताब्दे यद्युद्धमभवत् दुःखितो भूत्वा राष्ट्रियभावनां वर्धयितुमलिखत्।[10]

'भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा'। भारतस्याधारस्तम्भः भारतीयसंस्कृतिः संस्कृतभाषा च वर्तेते। अनेके आक्रान्ताः भारतमाक्रन्तितः परं तैः भारतराष्ट्रस्य निधिद्वयं न नाशितम्। किन्तु वर्तमानसमये (पाश्चात्यप्रभावेण) संस्कृतिः दूषिताः परं संस्कृतमधुनापि जीवति। परं तत्स्थानं तथा न वर्तते यथा भवितव्यम्। अनया वेदनया व्यथितो कविः वर्तमानराजनीतिं व्यंग्यति यवनाः आगताः आंग्लाः शासिताः तथापि न मृता एषा देववाणी (संस्कृतम्) परन्त्वधुना स्वसन्ततिभिः संसदि न प्रतिष्ठिता। अर्थात् सांसदैः अस्य कृते प्रयास न कृतः । केचन च प्रयासं कुर्वन्ति त्वन्ये विरोधं कुर्वन्ति।

यवना गौराङ्गा आयाता न तथापि देववाणी शीर्णा।
सन्ततिभिरेव किन्त्वधुनाऽसौ नाङ्गीक्रियते स्थातुं सदने।[11]

राष्ट्रियभावनायाः वर्णने कविः तथा समृद्धो न दृष्टः यथा सामाजिकराजनैतिकात्मिकसंवदेनासु दृश्यते। तथापि कविः तात्कालिकां समस्यां परीक्ष्य तत्वर्णयितुमुत्सुको दृश्यते यथा 1984 तमे जातः अलगावदास्य हिंसा स्यात्, कार्गिलयुद्धं स्यात् राजनेतृणां चरित्रं सर्वत्र कविः व्यंग्यन् कटाक्षं करोति। कविः स्वयमेव वीररसानुरञ्जको नास्ति सः स्वयमेव कथयति।

"अतः वीररसं विनापि राष्ट्रियान्ताराष्ट्रियभावना च हृदयस्थलात् निस्सरति।"

भारतीयसंस्कृतिः अन्ताराष्ट्रियभावनायुक्ता वर्तते तस्मात्कारणादधुनापि विद्यमानास्ति। भारतीसंस्कृतिमतिरिच्यानेकाः सभ्यताः संस्कृतिश्च जाताः परं ताः किञ्चित्काले एव नामशेषाः अभवन्। अर्थात् तासां सभ्यतानां नाममात्रावशिष्टम्। तस्याः अनुगन्तारः नष्टाः। तत्र कारणं स्वार्थमासीत् परं भारतीयसभ्यतायाः आधार एव वर्तते ''वसुधैव कुटुम्बकम्''। अस्यैव वर्णनं कुर्वन् कविः कथयति मयः, (मेक्सिको) मिस्रः (इजिप्ट) बेबिलोन (बेबलोनिया) असुर (असीरिया) पारसीकः (परसीया) के के न विनष्टाः अर्थात् एते सर्वे विनष्टाः वर्तमान समये एतेषामस्तित्वं नाममात्रेणैव विद्यते।

मयमिस्रबेबिलोना असुराश्च पारसीकाः।
के के न नामशेषाः प्रतिभाति कीदृशन्ते।।[12]

येषां मनसि विश्वमधिकर्तुमिच्छा वर्तते ते अन्ताराष्ट्रियभावनाशून्याः सन्ति। ते अन्येषां विषये न चिन्तयन्ति स्वस्यप्रभुत्वं स्थापयितुं प्रयतन्ते यथा (अमेरिकादीनि यूरोपीयराष्ट्राणि चीनादीनि एशीयायाः राष्ट्राणि) परन्तु कवि ऐतिहासिकोदाहरणेन वर्णयति यत् मरणात्परं मानवः सर्वमत्रैव त्यजति सार्धं किमपि न गच्छति तु अन्येषामुपर्याधिपत्यं किमर्थं क्रियते। सिकन्दरस्य प्रतिज्ञा आसीत् यत् पूर्णविश्वोऽयं मम मुष्टौ भवेत् तत्कृते च सः प्रयासरतो भवति। तत्परिणामेन विश्वमर्धं तस्याधिपत्ये आसीत्। किन्तु अन्तिमयात्रायां (प्राणयात्रायाम्) तस्य मुष्टौ उद्घटिता आसीत् तत्र (तस्याम्) च किमपि नासीत्। अतः सम्पूर्णजीवनस्येच्छा निरर्थकाऽभूत्। अत एवान्ताराष्ट्रियभावनायै भारतराष्ट्रस्य भावनानुसरणीया-

सर्वं ममैव मुष्टौ भवितेति ते प्रतिज्ञा
शिथिलैव सा प्रयाणे प्रतिभाति कीदृशन्ते।।[13]

सन्दर्भ ग्रंथ सूची

1. कार्गिलम् मत्तवारणी पृ. 24
2. सिद्धयेत् स्व ..... स्यात् कनीनिका पृ. 20/6
3. प्रतिमुण्डकं ...... सत्फलायते कनीनिका पृ. 54/3
4. क्व मार्गयानि हविर्धानी पृ. 126
5. कर्णधारा वयम् हविर्धानी पृ. 90/1
6. कस्मै खलु निवेद्येरन् मतवारणी पृ. 102/ 7
7. मत्तवारणी पृ. 104/5
8. हविर्धानी पृ. 30/ 8
9. कनीनिका पृ. 58/ 6
10. जायते निर्झरी हन्त कूलङ्कषा कनीनिका पृ. 64/1
11. प्रतिशाखमुलूका वल्गन्ते कनीनिका पृ. 114/ 10
12. शालभञ्जिका पृ. 112/4, 7
13. शालभञ्जिका पृ. 112/ 7